CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

श्रीः ॥ अथातुरसंन्यासविधिः ॥ सकलदोषापनोदनद्वारा संन्यासाधिकारसंपत्त्यर्थं च प्राजापत्यकृच्छ्रं प्रत्याम्नायेन करिष्य
इति संकल्प्य कृच्छ्रप्रत्याम्नायं षट्त्रिंशद्ब्राह्मणभोजनद्वारा निधास्यामि इति मंत्रेण वपनं कृत्वा ॥ आत्मन्यग्नि
समारोप्य ब्रह्मचर्यादाश्रमात् ... ज्ञानसंपत्त्यै च आतुरसंन्यासमहं करिष्ये इति संकल्प्य व्याहृतौ सावित्रीं प्रवे
शयामीति संकल्प्य ॐ भूः तत्सवितुर्वरेण्यं व्याहृतौ सावित्रीं प्रवेशयामि ॐ भुवः भर्गो देवस्य धीमहि व्याहृतौ
सावित्रीं प्र० ॐ स्वः धियो यो नः प्रचोदयात् व्याहृतौ सावित्रीं ॐ भूर्भुवः स्वः तत्सवितुः ० यात् व्याहृतौ सा
वित्रीं० प्रणवे व्याहृतीः प्रवेशयामीति संकल्प्य ॐ भूः प्रणवे व्याहृतीः प्रवेशयामि ॐ भुवः प्रणवे व्याहृ० प्र०
ॐ स्वः प्रणवे व्या० प्र० ॐ भूर्भुवः स्वः प्रणवे व्या० प्र० मि। अहं वृक्षस्य रेरिवा। कीर्तिः पृष्ठं गिरेरिव। ऊर्ध्व
पवित्रो वाजिनीव स्वमृतमस्मि। द्रविणं सवर्चसं। सुमेधा अमृतोक्षित इति। त्रिशंकोर्वेदानुवचनं। यश्छ
न्दसामृषभो विश्वरूपः। छन्दोभ्योऽध्यमृतात्संबभूव। स मेन्द्रो मेधया स्पृणोतु। अमृतस्य देवधारणो भू
यासं। शरीरं मे विचर्षणं। जिह्वा मे मधुमत्तमा। कर्णाभ्यां भूरि विश्रुवं। ब्रह्मणः कोशोऽसि मेधया पिहि
तः। श्रुतं मे गोपाय। पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थितोऽहं स्वाहेति जपित्वा हो
मार्थं आत्मा जलमादाय एकस्मिन् जलपात्रे द्वितीयपात्रस्थजलेन पाणिना जुहुयात्॥ एष वा अग्नेर्योनि
र्यः प्राणः प्राणं गच्छ स्वां योनिं गच्छ स्वाहेति प्रथमाहुतिः॥ आपो वै सर्वा देवताः सर्वाभ्यो देवताभ्यो जु
होमि स्वाहेति द्वितीयाहुतिः। पश्चात्तान्यस्य हुतशेषं आश्नुः ईशान इत्यनुवाकेनाभिमंत्र्य

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

आ॰सं॰ ५

णायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थितोहं स्वाहेति पिबेत्॥ अभयं सर्वभूतेभ्यो मत्तः
स्वाहा॥ ॐ भूर्भुवःसुवरिति शिष्टं सकलं जलं पिबेत्॥ अभयं सर्वभूतेभ्यो मत्तः स्वाहेति जलांज
लिं क्षिपेत्॥ इदमेवाभयदानं॥ अथोर्ध्वबाहुरादित्याभिमुखः प्रैषानुच्चरेत्॥ ॐ भूः संन्यस्तं
मया॥ ॐ भुवः संन्यस्तं मया॥ ॐ सुवः संन्यस्तं मया॥ ॐ भूर्भुवःसुवः संन्यस्तं मयेति त्रिवारं म
न्द्रमध्यतारस्वरेणोच्चरेत्॥ ॐ भूर्भुवःसुवः संन्यस्तं मया स्वाहेति प्राच्यां दिशं जलांजलिं निक्षिपेत्॥ शिखा
यज्ञोपवीतं चांजलौ गृहीत्वा भूः स्वाहेति भूमौ जले वा क्षिपेत्॥ आच्छादनं कटिसूत्रादि त्यजेत्॥ प्रण
वेन काषायादि गृह्णीयात्॥ इन्द्रस्येति दंडं॥ इन्द्रस्य वज्रोसि वार्त्रघ्नः शर्म मे भव जस्वजक्षं पुर
स्सरकेनामिमंत्र्य शिष्यमभिज्ञोथ्यरहसि प्रणवमुपदिश्य अथ बालः परमहंसपरिव्राजका
नाभिसाधुपदिशेत्॥ अथात्मानुसंधानं च कारयेत्॥ अत ऊर्ध्वं सर्वं प्रणवेन कारयेत्॥
इत्यातुरसंन्यासविधिः॥ सं॰ १८५८ अधिक ज्येष्ठ कृष्ण ८ भानुवासरे तद्दिने समाप्तं॥ ॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi